परैधितः, त्रि, (परैरेधितः सम्वर्द्धितः ।) औदासीन्येन परपुष्टः । परेण संवर्द्धितः । तत्पर्य्यायः । पराचितः २ परिष्कन्दः ३ परजातः ४ । इत्यमरः । २ । १० । १८ ॥ कोकिले पुं । इति शब्दमाला ॥

परोक्षं, क्ली, (अक्ष्णोः परम् ।) अप्रत्यक्षम् । असाक्षात् । यथा, चाणक्यशतके ।
"परोक्षे कार्य्यहन्तारं प्रत्यक्षे प्रियवादिनम् ।
वर्ज्जयेत्तादृशं मित्रं विषकुम्भं पयोमुखम् ॥"
(परोक्षं परोक्षत्वमित्यर्थः विद्यतेऽस्य । "अर्श-आदिभ्योऽच् ।" ५ । २ । १२७ । इति अच् ।) तद्विशिष्टे त्रि ॥ (श्रुत्याप्तजन्यादिज्ञानविशेषः । यथा, पञ्चदश्याम् । ७ । ३१ ।
"अस्ति कूटस्थ इत्यादौ परोक्षं वेत्ति वार्त्तयर ॥")

परोक्षः, पुं, (परोक्षमस्यास्तीति । श्रुत्याप्तवाक्यश्रवणजन्यदार्ढ्यमेवेति बोध्यम् ।) तपस्वी । इति शब्दमाला ॥ ययातिपुत्त्रस्यानोः पुत्त्रविशेषः । यथा, भागवते । ९ । २३ । १ ।
"अनोः सभानरश्चक्षुः परोक्षश्च सुतास्त्रयः ॥")

परोपकारः, पुं, (परेषामुपकारः ।) परेषामुपकृतिः । अन्यसम्बन्धिहितम् । यथा,—
"एष मे प्रवरो भाति शुद्धधर्म्मप्रदो विधिः ।
परोपकरणादन्यत् सर्व्वमल्पं स्मृतं बुधैः ॥
परोपकारिभिर्दत्ता स्वप्राणा ऋषिभिः पुरा ।
अद्भिः प्रेतोपकारः स्यात् किन्न लब्धं मया पुनः ॥
दधीचिना पुरा गीतः श्लोकश्च श्रूयते भुवि ।
सर्व्वधर्म्ममयः सारः सर्व्वधर्म्मज्ञसम्मतः ॥
परोपकारः कर्त्तव्यः प्राणैः कण्ठगतैरपि ।
परोपकारजं पुण्यं तुल्यं क्रतुशतैरपि ॥"
इति पद्मोत्तरखण्डे २२ अध्यायः ॥

परोवरीणः, त्रि, परांश्चावरांश्चानुभवति । ("परोवरपरम्परपुत्त्रपौत्त्रमनुभवति ।" ५ । २ । १० । इति ।) अवरस्योत्वं निपात्यते । श्रेष्ठाश्रेष्ठयुक्तः । इति सिद्धान्तकौमुदी ॥

परोष्णी, स्त्री, (परः शत्रुरुष्णो यस्याः ।) तैलपायिका । इत्यमरः । २ । ५ । २६ ॥ (काश्मीरदेशस्थनदीविशेषः । यथा, राजतरङ्गिण्याम् । ८ । २००७ ।
"कोष्टकोमल्लकोट्टाद्यैर्मितैर्युक्तोऽपि सादिभिः ।
तीर्त्वा परोष्णीं तत्सेनां निर्म्ममाथाप्रमाथिनीम् ॥")

पर्क्कटिः, पर्क्कटी, } स्त्री, (पृच् धौ च् सम्पर्के+बाहुलकादटिः ।"कृदिकारादक्तिनः ।"४।१।४५ इति वा ङीष् ।) प्लक्षवृक्षः । इत्यमरटीकायां भरतः ॥ पाकुड़ इति भाषा ॥ (यथा, हितोपदेशे । "अस्ति तत्र महान् पर्क्कटीवृक्षः ॥") तस्य गुणाः भावप्रकाशे ।
"प्लक्षः कषायः शिशिरो व्रणयोनिगदापहः ।
दाहपित्तकफास्रघ्नः शोथहा रक्तपित्तहृत् ॥"

पर्क्कटी, [न्] पुं, वृक्षविशेषः । पाकुड़ इति भाषा ॥ तत्पर्य्यायः । प्लक्षः २ जटी ३ । इत्यमरः । २ । ४ । ३२ ॥ कमण्डलुतरुः ४ । इति रत्नमाला ॥ कपीतनः ५ क्षीरी ६ सुपार्श्वः ७ कमण्डलुः ८ शृङ्गी ९ अवरोही १० शाखी ११ गर्द्दभाण्डः १२ पीतनः १३ दृढ़प्ररोहः १४ प्लक्षकः १५ प्लवङ्गः १६ महाबलः १७ । अस्य गुणाः कटुत्वम् । कषायत्वम् । शिशिरत्वम् । रक्तदोषमूर्च्छाभ्रमप्रलापनाशित्वञ्च । विशेषतो ह्रस्वप्लक्षस्यैते गुणाः । इति राजनिर्घण्टः ॥

पर्ज्जनी, स्त्री, (परं स्वास्थ्यं जनयतीति । पर्+जन+णिच् । "कर्म्मण्यण् ।" ३।२।१। इत्यण् । स्त्रियां ङीप् ।) दारुहरिद्रा । इत्यमरः।२।४।१०२॥

पर्ज्जन्यः, पुं, (पर्षति सिञ्चति वृष्टिं ददातीति । पृषु सेचने+"पर्ज्जन्यः ।" उणां । ३ । १०३ । इति निपातनात् षकारस्य जकारत्वे साधुः ।) इन्द्रः । (यथा, ऋग्वेदे ।६।५२।१६ । [सुष्टुतिं नः ॥")
"अग्नीपर्ज्जन्याववतं धियं मेऽस्मिन् हवे सुहवा
शब्दायमानमेघः । इत्यमरः । ३ । ३ । १४६ ॥ मेघशब्दः । इति विश्वः ॥ अगर्ज्जन्नपि मेघः । इति भरतः ॥ यथा, श्रीभगवद्गीतायाम् ।
"यज्ञाद्भवति पर्ज्जन्यः पर्ज्जन्यादन्नसम्भवः ॥"
(कश्यपपत्न्याः मुनेः पुत्त्रविशेषः । स तु गन्धर्व्वविशेषः । यथा, महाभारते । १ । ६५ । ४४ ।
"तथा शालिशिरा राजन्! पर्ज्जन्यश्च चतुर्द्दश ।
कलिः पञ्चदशस्तेषां नारदश्चैव षोड़शः ॥"
पर्ज्जन्य इव सर्व्वकामप्रदानात् विष्णुः । यथा, महाभारते । १३ । १४९ । १०० ।
"कुमुदः कुन्दरः कुन्दः पर्ज्जन्यः पावनोऽनिलः॥"
"पर्ज्जन्यवदाध्यात्मिकादितापत्रयं शमयति सर्व्वान् कामानभिवर्षतीति पर्ज्जन्यः ।" इति शाङ्करभाष्यम् ॥)

पर्ज्जन्या, स्त्री, (पर्ज्जन्य+टाप् ।) दारुहरिद्रा । इति राजनिर्घण्टः ॥

पर्ण, त् क हारित्ये । इति कविकल्पद्रुमः ॥ (अदन्तचुरां-परं-सकं-सेट् ।) हरित् पीतवर्णस्तस्य भावः हारित्यम् । पर्णयति पर्णापयति चम्पकम् । इति दुर्गादासः ॥

पर्णं, क्ली, (पिपर्त्तीति । पॄ+"धापॄवस्यज्यतिभ्यो नः ।". उणां । ३ । ६ । इति नः । यद्वा, पर्णयतीति । पर्ण त् क हारित्ये+अच् ।) पत्त्रम् । इत्यमरः । २ । ४ । १४ ॥ (यथा, कुमारे । ५ । २८ ।
"स्वयं विशीर्णद्रुमपर्णवृत्तिता
परा हि काष्ठा तपसस्तया पुनः ।
तदप्यपाकीर्णमतः प्रियंवदां
वदन्त्यपर्णेति च तां पुराविदः ॥")
ताम्बूलम् । यथा, राजनिर्घण्टे ।
"अनिधाय मुखे पर्णं पूगं खादयते नरः ।
मतिभ्रंशो दरिद्रः स्यादन्ते न स्मरते हरिम् ॥
ताम्बूलधारिलक्षणं यथा,—
"अनाहार्य्योऽनृशंसश्च दृढ़भक्तिश्च पार्थिवे ।
ताम्बूलधारी भवति नारी वाप्यथ तद्गुणा ॥"
इति मात्स्ये १८९ अध्यायः ॥
(पिपर्त्ति पालयति गगनपातादिति । पॄ+न । पक्षः । यथा, महाभारते । १ । ३३ । २४ ।
"तद्वृत्तदृष्टमभिप्रेक्ष्य तस्य पर्णमनुत्तमम् ।
हृष्टानि सर्व्वभूतानि नाम चक्रुर्गरुत्मतः ।
सुरूप पत्त्रमालक्ष्य तस्य पर्णमनुत्तमम् ॥")

पर्णः, पुं, (पिपर्त्तीति । पॄ पालने+"धापॄवस्यज्यतिभ्यो नः । उणां । ३ । ६ । इति नः । पलाशवृक्षः । इत्यमरः । २ । ४ । २९ ॥ (यथा, ऋग्वेदे । १० । ७ । ५ ।
"अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता ॥")

पर्णकारः, पुं, (पर्णं ताम्बूलम् । करोति उत्पादयतीति । पर्ण+कृ+अण् ।) वारजीवी । वारुइ इति भाषा ॥ इति केचित् ॥

पर्णकृच्छ्रः, पुं, (पर्णैः साध्यं कृच्छ्रं व्रतं यत्र । पत्त्रकृच्छ्रव्रतम् । यथा, याज्ञवल्क्ये । ३।३१६ ।
"पर्णोडुम्बरराजीवबिल्वपत्त्रकुशोदकैः ।
प्रत्येकं प्रत्यहाभ्यस्तैः पर्णकृच्छ्र उदाहृतः ॥"

पर्णखण्डः, पुं, (पर्णमेव खण्डो यस्य । पुष्पादिहीनत्वात्तथात्वम् ।) वनस्पतिः । इति शब्दचन्द्रिका ॥ (पर्णस्य ताम्बुलस्य खण्डः ।) ताम्बूलेकांशश्च ॥

पर्णचोरकः, पुं, (पर्णं चोरयतीति । पर्ण+चोरि+ण्वुल् ।) चोरकनामगन्धद्रव्यम् । इति राजनिर्घण्टः ॥

पर्णध्वत्, [स्] त्रि, पर्ण+ध्वन्स्+कर्त्तरि क्विप् । पत्त्रध्वंसकर्त्ता । इति व्याकरणम् ॥

पर्णनरः, पुं, (पर्णैः पलाशपत्त्रैर्निर्म्मितो नरः नराकारः पुत्तलकः ।) पित्रादिशवास्थ्यलाभे दाहार्थं तत्प्रतिनिधीभूतशरपलाशपत्त्ररचितोर्णातन्तुवेष्टितयवपिष्टलिप्तनराकारपुत्तलकः । यथा,
"आश्वलायनगृह्यपरिशिष्टम् । अस्थिनाशे पलाशवृन्तानां त्रीणि षष्टिशतानि पुरुषप्रतिकृतिं कृत्वा, अशीत्यर्द्धन्तु शिरसि ग्रीवायां दश योजयेत् ।
'उरसि त्रिंशतं दद्यात् विंशतिं जठरे तथा ॥
बाहुभ्याञ्च शतं दद्यात् दद्यादङ्गुलिभिर्दश ।
द्वादशार्द्धं वृषणयोरष्टार्द्धं शिश्न एव च ॥
ऊरुभ्यान्तु शतं दद्यात् त्रिंशतं जानुजङ्घयोः ।
पादाङ्गुलीषु च दश एतत् प्रेतस्य लक्षणम् ॥
ऊर्णासूत्रेण संवेष्ट्य यवपिष्टेन लेपयेत ॥'
आदिपुराणम् ।
'तदलाभे पलाशोत्थैः पत्त्रैः कार्य्यः पुमानपि ।
शतैस्त्रिभिस्तथा षष्ट्या शरपत्त्रैर्विधानतः ॥'
तदलाभे अस्थ्यलाभे । अत्र पलाशपत्त्रशरपत्त्रयोः तुल्यत्वेनोपादानात् आश्वलायनसूत्रेऽपि प्रतिकृतौ शरपत्त्रस्य लाभः । अत्राचारादयोग्यत्वाच्च शरपत्त्रैः पुत्तलकं कृत्वा शिरप्रभृतिषु पलाशपत्त्राणि देयानि । ततो वेष्टनं ऊर्णासूत्रेण लेपनं यवपिष्टेनेति । अशौचाभ्यन्तरदाहे शेषाहेनशुद्धिः । तदुत्तरपर्णनरदाहे तु त्रिरात्रम् । एवं पर्णनरं दग्ध्वा त्रिरात्रमशुचिर्भवेदित्यादि पुराणात् । यज्ञपार्श्वः ।
'पुत्त्राश्चेदुपलभ्येरन् तदस्थीनि कदाचन ।
तदलाभे पलाशस्य सम्भवे हि पुनः क्रिया ॥'